
## पञ्चमः पाठः

# अहम् ओरछा अस्मि

अहम् ओरछा! अहं टीकमगढमण्डले स्थितं प्राचीनं नगरम् अस्मि। पूर्वं स्वतन्त्रराज्यरूपेण मम परिचयः आसीत्। मम स्थापना षोडशशताब्दे बुन्देलाराजपूतेन रुद्रप्रतापेन कृता। माम् परितः सघनं वनम् अस्ति। अस्मिन् वने सागौनवृक्षाः अधिकाः भवन्ति। सागौनकाष्ठं बहुमूल्यं भवति। मम वने सिंहाः, व्याघ्राः, हरिणाः, नीलगावः, वानराः स्वच्छन्दं विचरन्ति। अन्येऽपि वन्यपशवः निर्भयाः वसन्ति। एतेषां वन्यपशूनां रक्षणाय शासनेन इदानीम् अभयारण्यं निर्मितम्। मम परिक्षेत्रे चतस्रः प्रमुखाः नद्यः प्रवहन्ति। धसान-जामिनी-जतारा-बेतवा नाम्न्यः नद्यः जलस्य आवश्यकतां पूरयन्ति, कृषिं, वनं, भूमिं च सिञ्चन्ति। जामिनीनद्याः तीरे जम्बुवृक्षाः अधिकाः भवन्ति। मम दक्षिणभागे जामिनीवेत्रवत्योः सङ्गमः अस्ति। तत्र सङ्गमात् जलस्य सप्तधाराः भवन्ति। अत एव जनाः लोकभाषायां तं स्थलं 'सप्तधारा' इति वदन्ति। वेत्रवत्याः तटे मम पुरातनः ऐतिहासिकः दुर्गः अस्ति। बहूनि मन्दिराणि अपि सन्ति। तत्रैव राज्ञां समाधयः अपि सन्ति। तटे एकं भव्यं रामराजामन्दिरं विद्यते। एतद् कलात्मकम् ऐतिहासिकं च मन्दिरम् अस्ति। मन्दिरे रामस्य, लक्ष्मणस्य, सीतायाश्च भव्याः, मनोरमाः प्रतिमाः प्रतिष्ठिताः। मन्दिरस्य उद्याने विषपानस्थलं वर्तते। अत्रैव वीरः हरदौलः विषपानं कृतवान्। मम भूमौ अनेके वीराः, धीराः, श्रेष्ठाः पुरुषाः अभवन्। तेषु हरदौलः मम अतिप्रियः आसीत्। सः राज्ञः जुझारसिंहस्य प्रियः अनुजः आसीत्। परं चाटुकारैः, धूर्तैः राज्ञः मनसि राज्ञीहरदौलसम्बन्धे सन्देहः उत्पादितः। हरदौलः महाराज्ञ्याः सम्मानरक्षणाय राज्ञः सन्देहनिवारणाय च विषपानं कृतवान्। अद्यापि तस्य बलिदानस्य स्मृतिः समस्ते क्षेत्रे सजीवा इव भाति। विवाहावसरे महिलाः तं प्रथमं पूजयन्ति।



मम दुर्गम् अपि सुदृढं कलात्मकं चास्ति। दरबारभवनम्, शीशभवनञ्च दुर्गस्य वैशिष्ट्यम् अस्ति। सर्वेषु भवनेषु स्थापत्यकलायाः सुन्दराणि चित्राणि मनांसि रञ्जयन्ति। भवनानां गवाक्षेषु अपि प्रस्तरपट्टिकासु सूक्ष्मं शिल्पकार्यं विद्यते। भित्तिकासु अपि मनोहराणि चित्राणि वर्तन्ते। दुर्गस्य अधस्तले काव्यकलाविदग्धायाः नर्तक्याः रायप्रवीणायाः आकर्षकं भवनमपि स्थितम्। वामे दर्शनीयं चतुर्भुजमन्दिरं विद्यते। अत्रापि प्रस्तरेषु कलायाः चित्रणम् अद्भुतं भाति। पुरतः सावन-भादौनामकौ स्तम्भौ प्रसिद्धौ।

ममपरिसरे एकं पुष्पोद्यानं वर्तते। तत्र विविधवर्णानि पुष्पाणि पर्यटकानां चित्तं मोदयन्ति। उद्यानस्य नातिदूरे हिन्दीभाषायाः प्रसिद्धकवेः केशवदासस्य स्थानमस्ति। षोडशशताब्दात् आरभ्य मम निर्माणम् अद्यावधि चलति एव। परं सर्वाधिकं निर्माणकार्यं महाराजवीरसिंहप्रथमस्य शासने अभवत्। मम इतिहासः रोचकः, कुतूहलपूर्णः च अस्ति। मध्यकाले मम विशिष्टं स्थानं महत्त्वञ्च आसीत्। अधुनाऽपि रामराजा तथैव विराजते। इदानीमपि जनाः प्रतिवर्षम् आगच्छन्ति माम् दृष्ट्वा च मुदिताः भवन्ति। अन्यानि अपि लक्ष्मीनारायणमन्दिर-फूलबाग-दीवान-हरदौलभवन-सुन्दरभवन-शहीदस्मारक प्रभृतीनि द्रष्टव्यानि स्थलानि सन्ति। प्रतिदिनं यात्रिणः आगत्य ममैतिहासिकं स्वरूपं दृष्ट्वा प्रसन्नाः भवन्ति तथा च तान् विलोक्य अहमपि प्रसन्नः भवामि।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| परितः | — चारों ओर | वन्यपशवः | — जंगली पशु, | विदग्धायाः — निपुण |
| गवाक्षेषु | — खिड़कियों में | दुर्गः | — किला | |
| सङ्गमः | — नदियों के पारस्परिक मिलन स्थल | भाति | — सुशोभित होता है | |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत—**
   - क. ओरछानगरं कस्मिन् मण्डले अस्ति?
   - ख. ओरछानगरस्य स्थापना कदा अभवत्?
   - ग. ओरछानगरस्य स्थापना केन कृता?
   - घ. विषपानस्थलं कुत्र वर्तते?
   - ङ. विषपानं कः कृतवान्?
   - च. ओरछानगरं परितः किम्?

2. **एकवाक्येन उत्तरं लिखत—**
   - क. ओरछानगस्य परिक्षेत्रस्य प्रमुखनदीनां नामानि लिखत?
   - ख. दुर्गस्य किं वैशिष्ट्यम्?
   - ग. भवनानां गवाक्षेषु किं विद्यते?
   - घ. हरदौलमहाराजः किमर्थं विषपानं कृतवान्?
   - ङ. प्रसिद्धकवेः केशवदासस्य स्थानं कुत्र अस्ति?
   - च. ओरछानगरे कानि द्रष्टव्यानि स्थलानि सन्ति?

3. **उचितं मेलयत—**

| | (अ) | (ब) |
|---|---|---|
| क. | ओरछानगरस्य परिक्षेत्रे | तं प्रथमं पूजयन्ति |
| ख. | विवाहावसरे महिलाः | अद्भुतं भाति |
| ग. | प्रस्तरेषु कलायाः चित्रणम् | चतस्रः नद्यः सन्ति |
| घ. | जुझारसिंहस्य प्रियः अनुजः | महाराजवीरसिंहप्रथमस्य शासने अभवत् |
| ङ. | सर्वाधिकं निर्माणकार्यं | हरदौलः आसीत् |

4. **उचितपदेन रिक्तस्थानं पूरयत—**

| | | | |
|---|---|---|---|
| क. | विषपानस्थलं ...................... वर्तते। | | (उद्यानस्य मध्ये/मन्दिरस्य प्राङ्गणे) |
| ख. | दरबारभवनं ...................... अस्ति। | | (दुर्गे/मार्गे) |
| ग. | केशवदासः ............... कविः आसीत्। | | (संस्कृतभाषायाः/हिन्दीभाषायाः) |
| घ. | ओरछानगरस्य इतिहासः .............. अस्ति। | | (मोचकः/रोचकः) |
| ङ. | जामिनीनद्याः तीरे .............. अधिकाः भवन्ति। | | (दाडिमवृक्षाः/जम्बुवृक्षाः) |

5. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत—**

क. शिल्पकार्यम्
ख. काव्यकलाविदग्धायाः
ग. विषपानस्थलम्
घ. विवाहावसरे
ङ. चतुर्भुजमन्दिरम्

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—**

क. अत्रैव
ख. महत्त्वञ्च
ग. अद्यावधि
घ. सर्वाधिकम्
ङ. भवनमपि

7. **समीचीनं चिनुत ( आम्/न )—**

क. ओरछानगरस्य दुर्गः सुदृढः कलात्मकः च नास्ति। ☐

ख. अभयारण्यं वन्यपशूनां रक्षणाय भवति। ☐

ग. ओरछानगरे भित्तिकासु मनोहराणि चित्राणि वर्तन्ते। ☐

घ. ओरछानगरस्य निकटे सप्तधाराः सन्ति। ☐

ङ रामराजामन्दिरे परशुरामस्य प्रतिमा अस्ति। ☐

**योग्यताविस्तारः —**

- अन्येषाम् ऐतिहासिकस्थलानाम् अवलोकनं कुरुत।
- मानचित्रे मध्यप्रदेशे ओरछानगरस्य स्थितिं प्रदर्शयत।

*रामो राजते यत्र तद्धाम परमं मम।*